वेला

***(कविसम्राट् श्रीविश्वनाथसत्यनारायणस्य** (చెలియలికట్ట)*
चेलियलिकट्ट इत्याख्यस्य अनुवादात्मको ग्रन्थः)

सीता :- भवती विप्रवनितैव किम् ?

रत्ना :- अहं विप्रवनितैव ।

सीता :- तर्हि अहं वचनभ्रष्टा न भवामि ।

रत्ना :- समुद्रोल्बणम् आगमिष्यतीति खलु ! कदा गमिष्यन्ति ?

सीता :- अचिरादेव गमिष्यामः । शाकटिकः शकटं सज्जीकृत्य इतोऽपि नागतवान् ।

रत्ना :- भवत्याः वचनं विश्वसनीयमेव वा ?

सीता :- विश्वसनीयं वा, न वा इति तां पृच्छतु - इति राज्यलक्ष्मीं प्रादर्शयत् ।

राज्य :- लोके यः कोऽपि विश्वसनीयः अस्ति इत्युक्ते सः अयमेव । मा भैषीः। मम पितुः, मम ज्येष्ठसपत्न्याः च आब्दिकानि कथमपि आचरणीयम्। कनिष्ठसपत्न्याः आब्दिकानामपेक्षया भवत्याः आब्दिकानि आचरिष्यति । एतावता भवती किमर्थं मरणीया ?

रत्नावली :- मम आब्दिकानि यदि आचरति, तर्हि अवरस्याः सपत्न्याः आब्दिकानि अपि आचरितवान् इव एव भवति भवान् । इतः पश्यतु कोशपुस्तकम् (Bank Pass Book) पत्राणि च (Documents)। तदनन्तरम् अपि पृच्छति भवान् किमर्थं म्रियेय इति ।

सीतारामस्य कृते क्रमशः तस्याः वचनेषु वीक्षणेषु च रत्नावली अदृश्यत। एतदनन्तरम् अपि अहं किमर्थं म्रियेय इति यदा रत्नावली वदति तदा सीतारामः सर्वम् अवगच्छति । हस्ते स्थितं वित्तपुस्तकम् उद्घट्य पश्यति । तत्र रत्नावल्याः नाम दृश्यते । तस्य सन्देहः अपगतः भवति । रत्नावली एवं वक्तुम् आरभते -

अहं किमर्थं म्रियेय कथयतु, अमृत्वा अहं कि कुर्याम् । येन भर्त्रा भवती सुखं जीवति, यः भर्ता सत्यमेव वदतीति साक्ष्यदानभाग्यं भवत्याः अजायत, यः भर्ता निरपेक्षतया अनाथायाः कृते आब्दिकानि आचारयिष्यामि - इति वाग्दानसमर्थः जातः । तादृशम् उदारं भर्तारं विसृज्य गतवती एषा अभाग्या अमृत्वा किं करोति?

भर्तुः परित्यागाय पुनः पुनः दुःखम् अनुभूय एतन्महापातकात् आत्मानं कथं पुनीतं कुर्याम् ? इति पुनः पुनः विचार्च, पुनः तादृशं भर्तारं न प्राप्नुयाम् इति ज्ञात्वा परितप्यमाना स्त्री, अमृत्वा किं करोति ? पठनात् धर्मः अवगच्छति। धर्मम् अजानाना अपि या सम्प्रदायेषु प्रवर्तिता भवति, तदा धर्मः अपि आचरिता एव भवति । प्रथमं धर्मम् अज्ञात्वा सम्प्रदायं परित्यक्ता, ततः स्वयंकृतम् अपराधम् अवगत्य स्त्री अमृत्वा किं करोति ? शुनकेभ्यः अपि नीचतया शरीरम् अधर्ममार्गे स्थापयित्वा, तेन पापेन जीर्णम् एतत् शरीरं किं मृतम् अथवा प्राणैः स्थितम् ? कथयतु सा स्त्री अमृत्वा किं करोति कथयतु ? यौवनं क्षणिकं भवति। तस्मात् अपि क्षणिकम् शरीरम् । यावत् धर्माचरणम् प्राणैः शरीरस्य

धारणं युक्तं भवति । सति शरीरे एव धर्माचरणाय अवकाशः । अतः शरीरं परिरक्षणीयम् । बुद्धिपूर्वकतया स्त्री आत्मनः देहम् धर्माचरणाय अनर्हं करोति । तादृशस्य देहस्य धारणे को वा लाभः ? इतोऽपि अनन्तरं सा स्त्री किमर्थं जीवेत्? 'का वा अहम् ?' इति ते जानन्ति । राज्यलक्ष्मि ! त्वं न जानासि । अहं तेषां पादयोः पतनाय अनर्हा । परन्तु 'का वा अहम् ?' इति यदि ते पूर्वमेव जानन्ति, तत् सुखम् अपि न लभते इति अज्ञात्वैव पादौ गृह्णामि । तौ पादौ तस्य अज्ञात्वा एव स्तनयोः स्पर्शयामि । मम शरीरं सर्वं पुनः स्वर्गखण्डं जातम्। मम पापानि सर्वाण्यपि अपगातानि । येन शरीरेण अहं पापानि आचरिता अस्मि तत् शरीरम् एव अपगन्तव्यम् अस्ति । उल्बणम् अवश्यं सम्भवति । समुद्रः मर्यादाम् (=वेलाम्) अतिक्रामति । मां स्वस्मिन् लीनं करोति । मयि विद्यमानायाः प्रकृतेः समुद्रे विद्यमानायाश्च प्रकृतेः भेदः नास्ति । अहं मर्यादाम् उल्लङ्घितवती। समुद्रः अपि मर्यादां (तीरम्) उल्लङ्घति । पश्यतु शकटम् आगतम् । वित्तपुस्तकं भद्रं कुरुथ वा ? युवां द्वौ, पुत्रम् एकवारं चुम्बितुम् अनुमतिं दास्यथः किम् ? यदा राज्यलक्ष्मी बालकं रत्नावल्यै ददाति तदा सीतारामः बालकं हस्तयोः गृह्णाति । स्वयं रत्नावल्यै ददाति । बालकं तृप्त्या अक्षिभ्यां गृहीतवती, चुम्बितवती, रुदितवती च । तथा दश निमेषाः प्रचलिताः । अनन्तरं बालकं राज्यलक्ष्मै ददाति ।

सरस्वती अन्तः गृहे स्थितां सामग्रीं सर्वाम् आनीय शकटे स्थापितवती । राज्यलक्ष्मी क्लैब्येन रत्नावलीम् एव पश्यन्ती अस्ति । रत्नावली गृहद्वारात् निस्सरति । राज्यलक्ष्मी तां रत्नावलीं परिगृह्णाति । भद्रे ! इमं पुत्रं गृहीत्वा त्वं जीवनं कुरु । अहं भवदपेक्षया तान् अधिकं न प्रीणामि । त्वं विद्यावती असि। धनवती च असि । पापं चरितवत्यपि तत्पापं ज्ञातवती असि । बालकं स्वीकुरु - इति वदति ।

सीतारामः तथैव तिष्ठति । रत्नावली, राज्यलक्ष्म्याः हस्तयोः एव स्थितं बालकं चुम्बति । भद्रे ! सत्यमेव । कियत् सुखम् अनुभविष्यामि - इति अहं जानामि । सः कियत् सुखम् अनुभविष्यतीत्यपि अहं जाने । परं मम गर्भे इतः परम् अपरः यदि जननम् एति, तर्हि सः त्वत्पुत्रसदृशः न भवति । सः गोलकः वा स्यात्, सः कुण्डकः वा स्यात्। किंकलकः अपि वा स्यात् । यदि तादृशं अहं प्रसवामि, सः मम कृते किं तर्पणं वितरति ? मातः त्वत् पुत्रः एव अलम् । स एव समर्थः (=पर्याप्तः) । त्वत् पुत्रः त्रयाणां पुरुषान्तराणां (Generations) कृते अलं भवति । भद्रे ! त्वं न जानासि । त्वं शरीरं पश्यसि । आत्मानं पश्यतु, मनः पश्यतु, अनुरागं पश्यतु, धर्मं पश्यतु । सुखं मा पश्यतु, सम्प्रदायं पश्यतु। बहिः मा पश्यतु, अन्तः पश्यतु । त्वाम् त्वद्भर्तारं च मा पश्यतु, त्वत् पुत्रमपि पश्यतु। प्रसूतिमपि पश्यतु, रक्तस्य पवित्रतां पश्यतु । स एव वर्णः भवति । तत्रैव गुणाः भवन्ति । गुणेषु यदि मालिन्यं तर्हि वर्ण विवर्णं भवति । धर्मः नश्यति । सुखानि भवन्ति, उद्योगाश्च भवन्ति । धनानि च भवन्ति । साधयामि अहम् । भवन्तः वाग्दानं मा विस्मरन्तु - इति वदति ।

रत्नावली समुद्रस्य अभिमुखं प्रयाति । सीतारामः प्रयान्त्याः तस्याः मार्गम् एव पश्यन्नेवास्ते । रत्नावली कियद्दूरं गच्छति । राज्यलक्ष्मी स्वभर्तारम् प्रति - यदि भवन्तः गत्वा तां गृह्णन्ति तर्हि सा समुद्राभिगमनं विरमति - इति वदति । सीतारामः रत्नावल्याः समीपं गच्छति । **“त्वम् आगच्छतु अहं लोकात् न बिभेमि । मम कृते राज्यलक्ष्मी यादृशी रत्नावली अपि तादृशी एव ।**” - इति वदति । रत्नावली समुद्राभिमुखं यान्ती एवास्ते ।

सीतारामः “रत्नावली न निवर्तते” - इति जानाति । मम मृता रत्नाम्बा यादृशी, समुद्राभिमुखं प्रयान्ती त्वमपि तादृशी एव - इति वदति । - रत्नावली निवृत्य, नमस्करोति । रत्नावली समुद्राभिमुखम् एव गच्छति ।

पूर्वाध्याये - रत्नावली प्रतिष्ठापुरं यदा प्रस्थास्यति, तदा रङ्गः सुषुप्तौ भवति । रत्नावल्याः निर्गमनानन्तरमपि रङ्गः पुनः पुनः तथैव किञ्चित्कालं स्वपिति । किञ्चित्कालानन्तरं निद्रातः जागर्ति । रत्नावली कुत्र ? गता वा ? ग्रामं गता स्यात् । समयः दश वादनम् आसीत् । रत्नावली न आगता । एकादश वादनम् अपि अभवत् । नैव आगता सा । कश्चित् सखा आगत्य, “रेलयानम् अधिरोहन्तीं रत्नावलीम् अहम् दृष्टवान्” - इति कथयति । यथाकथञ्चित् रङ्गः रत्नावली प्रतिष्ठापुरं गच्छन्ती अस्ति इति जानाति । सः सम्भ्रान्तः । किं वा कर्तव्यम् ? इति तस्य मनसि आलोचनैव न आगता । रत्नावली प्रतिष्ठापुरं किमर्थं गता ? स्वभ्रातरं सम्प्रार्थ्य पुनः तेन जीवनं कर्तुं गता वा ? रङ्गः नैव विश्वसिति । रत्नावली प्रत्येकताम् आपन्ना एका सन्न्यासिनी आसीत् । तस्याः सांसारिकजीवने आशा नास्ति । सा धर्मोपन्यासिनी परिणता । सांसारिकसुखम् अनुभवेयम् इति आसक्तिः (तस्याः) नासीत् ।

रत्नावली, स्वभ्रात्रा जीवनं कर्तुम् अङ्गीकृता अपि सीतारामः तु नाङ्गीकरोति । पापं कृत्वा पश्चात्तापम् अनुभूय, पुनः आत्मनः सकाशम् आगतां भार्यां स्वीकर्तुं पुरुषस्य कियद्वा औदार्यम् आवश्यकम् । इदमेव औदार्यम् रङ्गः संस्कारम् इति मनुते ।

आङ्ग्लभाषायां तस्य (Culture) इति अर्थः प्रसिद्धः । तथा स्वीकर्तुं विद्या न आवश्यकी इति तस्य अभप्रायः । सीतारामस्य तादृशः संस्कारः नास्ति। रत्नावल्याः गमनप्रयोजनं न सिध्यति । रङ्गस्य चिन्तनम् अधिकं भवति। सीतारामः तां (रत्नावलीम्) निराकरोति चेत् स्वयं गत्वा “रत्नावलीं पुनः आनेष्यामि” इति चिन्तयति । रत्नावल्याः सांसारिकजीवने इच्छा न भवति तर्हि आश्रमजीवनं यापयति अत्रैव ।

रङ्गः प्रस्थातुं रात्रिपर्यन्तं शकटं नास्ति । तस्य त्वराऽनुगुणम् प्रयाणानुकूल्यं नास्ति । एकवादनसमये कावलि पर्यन्तम् एकं शकटं गच्छति । तस्मिन् गन्तुं निश्चिनोति । कावलिपर्यन्तं गत्वा किं करोति ? तत्र मेयिल् अधिरोहति । तत्र मेयिल् अधिरोहणापेक्षया, चेन्नपुरीतः एव मेयिल् मध्ये गन्तुम् उचितं खलु । एकवादने एव शकटम् अधिरुह्य गमने, तस्य प्रस्थितः सन् गच्छामि इति तृप्तिः भवेत् किल ?

रङ्गः प्रयाणाय सन्नद्धः भवति । सामाग्रीं संगृह्णाति । अत्रान्तरे तस्य "मनसि पुनः चेन्नपुरीं न आगच्छामि किं ? किमर्थं नागच्छामि ? तथा मनसि चिन्ता जाता । चिन्तनमेव न, तस्य कृते सः भावः निश्चयः जातः । रत्नावल्या सह स्वयं यस्मिन् कस्मिन्नपि आश्रमे वसेयम् वा ।

लोकस्य उपरि तस्य तीव्रं वैराग्यं नास्ति । परं तस्य मनः इदानीं स्वकीयं न भवति पुनः अनिवर्तने चेन्नपुर्यां स्थितानि आसन्दिकानि, पर्यङ्कानि, खट्वाः, मशकजालानि एतानि सर्वाण्यपि किं भवेयुः ? कोशे सहस्ररूप्यकाणि सन्ति । तानि किं भवेयुः ? रत्नावल्याः कोशपुस्तकम् अपि पेटिकायाम् अस्ति । तत् किं भवेत् ? रङ्गः पेटिकाम् उद्घाट्य दृष्टवान् । आत्मनः एव एकं कोशपुस्तकम् अस्ति । रत्नावल्याः कोशपुस्तकं नास्ति ।

रत्नावल्या नीतं स्यात् । नीत्वा सा किं करोति ? किं सीतारामाय ददाति? किं सीतारामः स्वीकरोति ? किं वा ? दश वा पञ्चादश वा शतैः आगतां स्त्रियं कः निराकरोति (तिरस्करोति)?

प्रकृते - अहं किं भवेयम् ? अहमपि प्रतिष्ठापुरं गच्छेयम् वा ? गत्वा ... । अत्रान्तरे नीलाम्बरः आगच्छति । सः प्रयाणाय पेटिकासु मातुलस्य सामग्रीपूरणं पश्यति ।

नीलाम्बरः :- मातुल! मातुलानी कुत्र ?

रङ्गः :- प्रतिष्ठापुरं गतवती । ... किमर्थम् ?

नीलाम्बरः :- मम कश्चन संशयः जातः तां पृष्ट्वा अपनुदेयम् ।

रङ्गः :- कः सः संशयः ?

नीलाम्बरः :- भवतः कथने कः लाभः भवान् यथा अर्थशास्त्रं जानाति, न तथा भाषाशास्त्रम् । यथा कामशास्त्रं जानाति, न तथा धर्मशास्त्रम् ।

रङ्गः :- भवता अपि तथैव अवगतो वा ?

नीलाम्बरः :- मया अवगतः न, त्वया उक्तः एव खलु अयं विषयः ।

रङ्गः :- समाधातुम् अशक्तः अहम् । बाढम् । किं प्रश्नः श्रोतम् अनर्हः ?

नीलाम्बरः :- श्रोतुम् अर्हः एव ।

रङ्गः :- तर्हि कथयतु ।

नीलाम्बरः :- त्वं रेलयानाय गच्छसि खलु ।

रङ्गः :- अहम् एकवादनसमये गच्छामि । इदानीं सार्धैकादशवादनम् एव अभवत् ।

नीलाम्बरः :- तर्हि शृणोतु । काचन भार्या भर्तारं विसृज्य गतवती । ततः पश्चात्तापमनुभूय पुनः भर्तुः सकाशं गत्वा आत्मानं स्वीकरोतु इति अभ्यर्थयति। सः स्वीकुर्यात् वा ? न वा ?

रङ्गः :- अयं प्रश्नः भवतः कस्मात् जातः ?

नीलाम्बरः :- एतादृशी काचन कथा प्रवृत्ता ।

रङ्गः :- सः भर्ता स्वीकृतवान् वा ?

नीलाम्बरः :- स्वीकृतवान् वा, न वा ? न जानामि ।

रङ्गः :- यदि अहं तर्हि अवश्यं स्वीकरिष्यामि ।

नीलाम्बरः :- आवयोः कथनं न, स्वीकरणे स्थितः धर्मः कः ? अस्वीकरणे स्थितः धर्मश्च कः ? स एव मम प्रश्नः ।

रङ्गः :- रत्नावलीम् एव पृष्ट्वा संशयनिवृत्तिं करोतु । आगच्छतु साधयावः।

नीलाम्बरः :- अहं न आगच्छामि । मम कृते मासाभ्यन्तरे परीक्षाः सन्ति।

रङ्गः :- परीक्षाणाम् अनन्तरं किं करोषि ?

नीलाम्बरः :- यत्र कुत्रापि फलकं (Board)स्थापयामि ।

रङ्गः :- फलकं स्थापयितुं प्रथमतः धनम् आवश्यकम् । न्यूनातिन्यूनं सहस्ररूप्यकाणि आवश्यकानि भवेयुः ।

नीलाम्बरः :- जननभाग्यं कल्पितः भगवान् एव पोषणभारमपि वहति । यं कमपि मार्गं सः एव दर्शयति ।

रङ्गः :- मम सकाशे सहस्ररूप्यकाणि सन्ति । तानि च कोशागारे सन्ति । त्वदर्थं स्थापितवान् अस्मि । पश्यतु, कोशपुस्तकं स्वीकरोतु । भवतः नाम्ना अनुमति-आदेशं (Withdrawal) लिखित्वा दास्यामि ।

नीलाम्बरः :- दद्धनं मह्यं दास्यसि चेत् भवान् किं भवति ?

रङ्गः :- अहं प्रतिष्ठापुरं गच्छामि । अस्मिन् (गृहे) स्थितां सामग्रीं सर्वां भवते दास्यामि । नैव । भवते अदाम् । भवान् अत्रैव तिष्ठतु । इतः परम् अत्र नागच्छम् । अहं साधयामि ।

एवं वदन् एव रङ्गः नीलाम्बरनाम्ना पत्रं विलिखति । तस्मै ददाति। पेटिकां स्वीकरोति, प्रस्थास्यति । पुनः निवृत्य आगच्छति । पेटिकाऽपि मह्यं किमर्थम् ? इति चिन्तयन् ताम् (पेटिकाम्) अपि तत्रैव विसृज्य गच्छति ।

नीलाम्बरः रङ्गेन दत्तं पत्रं पश्यति । सः पञ्चाशत् पैसानां स्टाम्प् पेपर्-मध्ये लिखितः अनुमत्यादेशः (वीलुनामा) । नीलाम्बरः आश्चर्येण चकितः (Stunned) भवति । गच्छन्तं रङ्गम् आह्वयितुमपि तस्य मुखात् वचः न निस्सरति । एकवादनादनन्तरम् तस्य दिग्भ्रान्तिः विसृष्टा भवति । तावदेव रङ्गः रेलयानम् अधिरुह्य गतवान् स्यात् । नीलाम्बरः सेन्ट्रल् स्टेषन् कृते गच्छति । रेलयानं तदैव प्रस्थास्यति । सः (नीलाम्बरः) पुनः रङ्गस्य गृहं गच्छति । गृहे स्थितां सामग्रीं पश्यति ।

तस्याः सामग्र्याः मूल्यं चतुश्शतं वा पञ्चशतं वा (रूप्यकाणि) भवति। अनेकानि पुस्तकानि सन्ति । नीलाम्बरः सूर्यस्य अस्तमयानन्तरं कवाटान् बध्नाति। तालं निक्षिपति। कुञ्चिकां कञ्चुके स्थापयति । ततः निर्गच्छति ।

रङ्गः रेलयानम् अधिरोहति । तत् रेलयानं स्टेषन् स्टेषन् मध्ये स्तगन् गच्छति । गूडूरु स्टेषन् प्राप्नोति । तदा सायं पञ्चावादनम् भवति । तत्र वातः अधिकं वाति । तथैव शनैः शनैः रेलयानं नेल्लूरुपट्टणं प्राप्नोति । तदा रात्रौ अष्टवादनम् भवति । रेलयानं तत्रैव स्तगति । तावदेव वातः बोय्... (वातवहनस्य ध्वन्यनुकरणशब्दः) इति कर्णेषु ध्वनिं करोति ढभेल् इति रेलयानस्य पेटिकाः परस्परमधिरोहन्ति । परस्परम् अवमर्दन्ते च । उद्घाटितेभ्यः वातायनेभ्यः शीघ्रं

प्रसरन् जंझावातः असिः इव मुखानि प्रहरति । वृक्षाः स्वाग्रभागान् प्रतिलोमं पातयित्वा भयावहतया उच्चलन्ति । रेलपेटिकाः अधः पतन्तीति चिन्तयन्तः जनाः रेलयानतः अवतरन्ति । स्टेषन् मध्ये एव रक्षणं प्राप्नुवन्ति । वातेन सहैव वर्षम् धारापातं आपतति । समुद्रे भयङ्कराः तरङ्गाः उच्चलन्ति । मध्ये एव विच्छिद्यन्ते च । फेनैः शीकरैः च तरङ्गाः पोतम् (Boat) इव कश्चन जंझावातः अकस्मात् जनानां मुखानि, पृष्ठानि च अताडयत् ।

मुष्टिधृतैः सन्नैः पाषाणैः युगपदेव सबलं मुखे ताडितम् इव वर्तते । मुखस्थाः मसूची (Cholora) अङ्काः, सूच्यः युगपदेव अन्तः प्रविशन्तीव तीक्ष्णं बाधते । तेन जनाः भयभ्रान्ताः सन्तः पीडाम् अनुभवन्ति । वर्षकारणतः सर्वेषां धृतानि वस्त्राणि सिक्तानि भवन्ति । हु हु हु इति वेपमानाः जनाः भित्तीः आलम्ब्य निलीनाः भवन्ति।

रङ्गस्य मनः तु प्रतिष्ठापुरम् उद्दिश्य एव धावति । इदं वर्षम् आत्मनः सङ्कल्पम् अवरुणद्धि । इदं वर्षं यदि अद्य न भवति, तर्हि अहम् इदानीं मेयिल् यानम् निरीक्षमाणः भवेयम् । स्टेषन् मध्ये सर्वेऽपि अद्य मेयिल् यानम् न भवेत् एव इति कथयन्ति विचारणे ।

ततः अन्यस्मिन् दिने दशवादनसमये पुनः रेल् प्रस्थास्यति । तावत् पर्यन्तं रङ्गस्य भोजनं नास्ति । तत् रेल् (अन्यस्मिन् दिने) अन्येद्यवि मध्याह्णे द्वादशवादनसमये विजयवाटिकां प्राप्नोति । तावत् पर्यन्तं रङ्गस्य भोजनम् एव नास्ति । अनुपदमेव प्रतिष्ठापुरं शकटं प्रस्थितम् । तत् सायं त्रिवादनसमये प्रतिष्ठापुरं प्राप्नोति । सः शकटात् अवतरति । चलितुमशक्तः अस्ति - इति जानाति सः । भोजनं कृत्वा दिनद्वयम् अभवत् । धनहीनाः तथैव भवन्ति किल। आहारहीनस्य देहे शक्तिः न भवति । दुष्टः कामम् अपि न भवति । अहङ्कारः अपि न भवति । एतानि सर्वाण्यपि आहारेणैव जायन्ते ननु ।।

रङ्गः वीथीं गच्छति । कानिचन चणकान् किञ्चित् गुडं च क्रीत्वा खादति । गते, प्रतिष्ठापुरे वर्तकस्य गृहे चणकान् क्रीत्वा खादितं विषयं स्मरति। तस्यैव वर्तकस्य गृहे स्थितान् एव पृष्ट्वा किञ्चित् तक्रं गृह्णाति, पिबति च । तदैव प्रातः प्रभृति पतत् वर्षं किञ्चित् अधिकम् भवति ।

परह्यः प्रभृति रङ्गः स्नानं न अकरोत् । प्रस्थिते दिने रात्रौ वर्षकारणतः सिक्तानि तस्य वस्त्राणि देहोपरि एव सन्ति । अत्रान्तरे द्विवारं त्रिवारं वा स्वेदः अजायत । पुनः शोषमाप्तः । तेन धृतानि वस्त्राणि रोटिकानीव कठनानि जातानि। कठिनानां वस्त्राणां स्पर्शनेन शरीरस्य असौकर्यम् असौख्यं क्लेशः च जायते ।

सः प्रतिष्ठापुरस्य मार्गम् अधितिष्ठति । मार्गे परस्परं वदतोः द्वयोः सम्भाषणं तस्य कर्णपथम् आगच्छति - प्रतिष्ठापुरं समुद्रे विलीनः, तस्मात् प्रदेशात् जनाः सर्वे तं ग्रामं त्यक्त्वा आत्मरक्षणाय अन्यत्र गच्छन्ति - इति । रङ्गः शिरः उन्नम्य तौ पश्यति । पुनः स्वमार्गमेव अनुसरन् गच्छति । ज्ञातोऽपि मार्गः जलेन पूर्णत्वात् स्मर्तुम् अशक्य इव वर्तते । तथापि मार्गस्य एकत्वात् क्लेशं विनैव स्मरन् गच्छति ।

सः मार्गे अर्धादधिकं दूरं गच्छति । तेन धृतानि वस्त्राणि सर्वाण्यपि सिक्तानि । तेषां स्पर्शनेन इदानीं बाधा नष्टा । स्नानस्य अकरणेन जाता जुगुप्सा अपि नास्ति । सः सिक्तं युतकं विसृज्य प्रपीड्य कक्षायां वहति । किञ्चित्कालानन्तरं युतकमपि भारं भवति । विसृज्य दूरतः क्षिपति । स्वस्य उत्तरीयं प्रपीड्य, शिरः वेष्टयति । धृतम् अधो वस्त्रम् उपरि कर्षति । आमार्गं पङ्ककलुषितानि जलानि तस्य शरीरे पतन्त्येव । तथापि सः गच्छन् एवास्ते ।

बलाढ्यौ द्वौ वृषभौ, प्रयासेन कर्षमाणम् आतपापनोदकं शकटं च तस्य अभिमुखम् आगच्छति। शकटस्य समीपागमनपर्यन्तं तत्रैव स्थित्वा श्रमाम् अपनुदति। आतपापनोदकशकटम् उभयतः कम्बलानि लम्बन्ते । अन्तः के सन्ति ? इति न दृश्यते । शाकटिकः पुरतः गच्छति । नियन्त्रणाय वृषभयोः शिरसि बन्धितान् रज्जून् हस्ते धरति । पात्रे कश्चित् उपविश्य तालच्छत्रं वर्षात् रक्षणाय धरन् वृषभौ चोदयति ।

Patan Vali Saheb
Research Scholar in Sahitya
Rashtriya Sanskrit Vidyapeetha
Tirupati - 517 507
Cell - 08885161850

Prepared and Submitted to
TWO DAYS NATIONAL TRANSLATION WORKSHOP INVOLVING SANSKRIT AND TELUGU,
held on 27th and 28 March 2010

Rashtriya Sanskrit Vidyapeetha
Tirupati - 517 507
Cell - 08885161850